# Agastyadvadashanamavali

# અગસ્ત્યદ્વાદશનામાવલિઃ

## Document Information

Text title : Agastyadvadashanamavali

File name : agastyadvAdashanAmAvaliH.itx

Category : deities_misc, tAmraparNImAhAtmya, dvAdasha, nAmAvalI

Location : doc_deities_misc

Proofread by : PSA Easwaran

Description/comments : tAmraparNImAhAtmya | adhyAya 31/4-21||

Latest update : December 13, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 13, 2025

*sanskritdocuments.org*

# અગસ્ત્યદ્વાદશનામાવલિઃ

અગસ્ત્યનામાવલિઃ

કાશ્યપઃ –

શિવશર્મન્ મહાભાગ શ્રુણુ તે કથયામ્યહમ્ ।
યસ્ય વિજ્ઞાનમાત્રેણ સ્વયમાયાન્તિ સમ્પદઃ ॥ ૪॥

અશ્રોત્રિયેષુ પાપેષુ વેદમાર્ગવિરોધિષુ ।
ન દાતવ્યમિદં સ્તોત્રં મન્ત્રરાજં મહામતે ॥ ૫॥

ઋષિરિન્દ્રસ્તથાનુષ્ટુપ્ છન્દો દેવો ઘટોદ્ભવઃ ।
સર્વાભીષ્ટસ્ય સિધ્યર્થે જપોઽયં વિનિયોજિતઃ ॥ ૬॥

પાટીરશૈલકોટીરમણિપીઠાય વેધસે ।
મુનયે કુમ્ભજાયોદ્યદનુકમ્પાબ્ધયે નમઃ ॥ ૭॥

લોપામુદ્રાસમાયુક્તં મહાયોગાસનસ્થિતમ્ ।
પ્રસન્નં તપસાં રાશિં પ્રણુમઃ કુમ્ભસમ્ભવમ્ ॥ ૮॥

ઇતિ ધ્યાત્વા નમસ્કૃત્ય જપેન્નામાવલિં મનુમ્ ।
અગસ્ત્યઃ કુમ્ભસમ્ભૂતો મૈત્રાવરુણિરબ્ધિપઃ ॥ ૯॥

લોપામુદ્રાપતિશ્શ્રીમાન્ વાતાપીલ્વલભક્ષણઃ ।
વિન્ધ્યાદ્રિમથનો યોગી મહામલયકેતનઃ ॥ ૧૦॥

સર્વતીર્થાત્મકપદો ભક્તાભીષ્ટફલપ્રદઃ ।
લોપામુદ્રાભુજાશ્લેષહર્ષરોમાઞ્ચમૂર્તિમાન્ ॥ ૧૧॥

નામ્નાં દ્વાદશકં પુણ્યમગસ્ત્યસ્ય મહાત્મનઃ ।
પઠન્ત્યપિ ચ શ ૃણ્વન્તિ તે વૈ સુકૃતિનઃ પરમ્ ॥ ૧૨॥

તેષામભીષ્ટદાનાય ભગવાન્ કુમ્ભસમ્ભવઃ ।
અદ્યાભ્યુદ્યત્કરામ્ભોજો નાત્ર કાર્યા વિચારણા ॥ ૧૩॥

યશસ્યં ધન્યમાયુષ્યં જ્ઞાનદં ભુક્તિમુક્તિદમ્ ।
નામ્નાં સ્તોત્રં પઠેદ્વિદ્વાન્ પુરુષાર્થાઃ કરે સ્થિતાઃ ॥ ૧૪॥

વિમલહૃદયમુચ્ચૈર્વેદવેદાન્તવેદ્યં
વિધિમુખસુરપૂજ્યં ભૂતિરુદ્રાક્ષભાજમ્ ।
મુનિવરમમલાઙ્ગ્યા ધર્મપત્ન્યાઽઽપ્તભાગં
કલશજમભિરામં નૌમિ કારુણ્યમૂર્તિમ્ ॥ ૧૫॥

ઇત્યેતત્પરમં ગુહ્યં મન્ત્રં સર્વાર્થસાધકમ્ ।
યતીશ્વરાદનુપ્રાપ્ય પ્રાપ્તવાન્ પરમં સુખમ્ ॥ ૧૬॥

નિત્યપ્રમોદભૂયિષ્ઠં પ્રમોદઃ પ્રાપ્તસૌભગઃ ।
ઉપર્યુપરિ ધર્મસ્ય પ્રાપ્તભૂતો ન સંશયઃ ॥ ૧૭॥

ચન્દનાદ્રિસમુદ્ભૂતે સત્યે શઙ્કરલાલિતે ।
ત્વયિ સ્નાસ્યે સુપ્રસન્ને પાહિ માં ભવસાગરાત્ ॥ ૧૮॥

ઇતિ મન્ત્રં સમુચ્ચાર્ય સ્નાત્વા તામ્રાનદીજલે ।
પિતૄન્ દેવાન્ ઋષીન્ તર્પ્ય નાભિદઘ્નજલે સ્થિતઃ ॥ ૧૯॥

જપેન્મન્ત્રમિદં મન્ત્રી ત્રિવારં વિજિતેન્દ્રિયઃ ।
ષણ્માસાદેવ સુપ્રીતસ્તસ્ય ભૂયાદ્ઘટોદ્ભવઃ ॥ ૨૦॥

શિવશર્મન્ ત્વયા જપ્યં પ્રત્યહં પ્રીતિમિચ્છતા ।
ઇતિ તેન સમાખ્યાતાં કથાં કલિમલાપહામ્ ॥ ૨૧॥

ઇતિ તામ્રપર્ણીમાહાત્મ્યે એકત્રિંશાધ્યાયાન્તર્ગતં
અગસ્ત્યદ્વાદશનામાવલિઃ

તામ્રપર્ણીમાહાત્મ્ય । અધ્યાય ૩૧/૪-૨૧॥

tAmraparNImAhAtmya . adhyAya 31/4-21..

Proofread by PSA Easwaran

*Agastyadvadashanamavali*

pdf was typeset on December 13, 2025

Please send corrections to *sanskrit@cheerful.com*